क्रियोपश्लेषस्यापि भावस्यैव पर्यालोचनेनेदमुदाहरणं मायातत्र एवोक्तं ते दृष्टिमात्रयंत्रित इत्यादिकं यद्दर्शितं तदुदाहरणं
षष्ठोल्लासे वक्ष्यते तद्देवोदाहरणं बोध्यं॥ ॥इति श्रीमहेश्वरन्यायालंकारमहाचार्यविरचिते काव्यप्रकाशादर्शे का
व्यप्रयोजनादिनिरूपणप्रथमः परिच्छेदः॥ ॥विशिष्टाः शब्दार्थयोः काव्यत्वेनोक्तता बोध्यबोधकभावस्यैव
चैवैशिष्ट्यत्वेन कया कया इत्याह बोध्यबोधकतारूपवैशिष्ट्यमभिसाकांक्षायां तन्निरूपयति यौवै॥शिष्टशब्दौ विशेषांसाका
विकामुत्थापयति क्रमेणोजितया च बोध्यबोधकत्वमिति स्वरूपकथनमेवोपक्रान्तं तत्र वाचक इत्यादिनेति बोध्यं ननु वा
चकसंकेतकलादिकथनेनतथा सति साक्षात्संकेतितमित्यादि वाचकलक्षणे वक्ष्यमाणे वहुविशेषणवैयर्थ्यस्यादिति
न दोषः सवेदर्शयिष्यामः एवं च साक्षाद्वाचक इत्यादौ साक्षात्पदं गौलक्षणायां प्रतियादकत्वाद्यतो इत्यादि रेवार्थः अत्र काव्य इति

१६ यद्यप्यकाव्यस्योविशद् अलंकारिकैर्व्यंजकत्वमत इति व्याख्यातुमुचितं तथा च काव्यविवेचकालंकारशास्त्रय
16 मेवात्र काव्यपदवोध्यं स्वरूपं लक्षणं केषुचिदिति प्राचीननैयायिकमतेत्वित्यर्थः नन्वमते तदोपस्थापितानां पदा
र्थानां संसर्गो भासमानत्तात्सर्वावृत्तिमपेक्षते तात्पर्यविषयसंसर्गस्येव वाक्यार्थत्वात् ह आकांक्षेति अ
भिधानापर्यवसानमाकांक्षा वाधविरहो योग्यता उपस्थितानामन्वयप्रतियोगिनामव्यवधानं सन्निधिः वक्ष्यमाणेति
जासादिजागिरेववेत्यादिना वक्ष्यमाणेत्यर्थः समन्वये समन्वयवोधे समन्वयात्मक एव वाक्यार्थः समुल्लसतीति विषयी
भवति कीदृशः विशेषवपुः विलक्षणरूपं वैलक्षण्यमेव पुनर्विवृणोति अपदार्थ इति पदाप्रतिपाद्य इत्यर्थः नहि क
स्यप्रतिपाद्य इत्यत आह वाक्यार्थ इति वाक्यप्रतिपाद्य इत्यर्थः अभिहितेति अभिहितानां पदोपस्थापितानां मन्वयवोधे
वादिनां नैयायिकानामित्यर्थः संसर्गस्य पदावाच्यतया तन्नैयायिकैः तात्पर्याख्या वृत्तिः स्वीक्रियते तत्रैव मीमांस एम.
कसिद्धमित्याह वाच्य एवेति वाक्यार्थसंसर्गो वाच्यः पदशक्त्य एवेत्यर्थः इतरान्वितत्वेनैव पदशक्तिग्रहः पदं विशेष १६

समभिव्याहारानुपपत्त्या विशेषाक्लिष्टत्वस्येति दिति तेषां मतं तन्नैवं शब्दस्यैव व्यंजकत्वमुक्तं तत्कथं शब्दार्थयुगला-
त्मनः काव्यस्य व्यंजकत्वमुक्तमित्यस्तोऽर्थस्यापि व्यंजकत्वमाह सर्वेषामिति अर्थानामपीत्यर्थान्वयः। अव्यंजकत्वम-
विकस्य चिदर्थस्येत्यत आह प्रायश इति सर्वेषां वाच्यलक्ष्यव्यंग्यानां वाच्यस्यापीत्यत्र व्यंजकत्वमित्यन्वयः। एवमुक्त-
रहृदयोपि माद्यति माहात्म्ये हो पकारणमत्र हिनास्तीति साधितं त्वया तद्द्वनं किंकारणीयमेवमेवन वासनस्थापीति सं-
स्कृतं। प्रस्तुतहृदयहृद्याप्यापारेण स्वेवं विहन्तुमक्षमा यागस्तत्र पामतेऽर्थशक्तिरियं साधितं प्रतिपादितं एवमेव निर्व्यापार ए-
वास्थापीत्यस्यार्थाः स्तुति अत्रेति व्यञ्जते वाच्यार्थेन वाच्ये न तत्सकलपदार्थतो धानंतरमेव एतादृशाबोधो द्याततः। सहृदं नीति सा-
धयतीत्यत्र विमृशम गंसमोस सण्डुनास्तिमम हृते। सद्भावा स्तिहकरणासम सदृशं तावद्धि रचितं त्वया इति संस्कृतं। उपनायको-
पमुक्तां दूतीं प्रति नायिकायाः सोल्लुण्ठोक्तिरियं सद्भावः स्निग्धता अत्रेति नन्वेतादृशोऽर्थोऽनेकस्यापि यदस्य लक्षणागम्यः
तथा हेतुता पर पदार्थस्य निराकांक्षत्वेनात्र पासंभवात् अत्र वाचीनाः लक्ष्यमित्यत्र लक्षणामूलव्यंग्यमित्यर्थः। लक्ष्या

यैस्तु सद्भावस्नेहैरेव एवं मम मन्यते इत्यत्रापि स्वस्य स्मृते इत्येव लक्ष्यार्थः न चैवं तन्नेचेत्यादि व्यंग्यांतरप्रदर्शनमनुपयुक्तमिति
वाच्यं प्रसंगादेव व्यंग्यस्यापि व्यंग्यांतरप्रदर्शनादित्याहुः। तन्न लक्ष्यमाणस्यार्थस्य नैनेव लक्षणामूलत्वप्राप्तेः पुनस्तत्कथना
नुपपत्तेः अनुपयुक्तस्य व्यंग्यव्यंग्यकथनासौ विरुद्धा। चकोरवर्तिनी तु सदृशाय दस्य भ्रांतत्वं च लक्ष्यं तथा च मत्प्रियं रमयंत्या
त्वया आचरितं शकुंतलया इत्यर्थ इत्याहुः। तदपि न तदा सद्भावस्नेहकारणीयस्य शत्रुत्वमित्यर्थस्यानुपपत्तेः। ता दृश्य कारणी
यस्याचेतनस्य शत्रुत्वाभावात्ताभ्यां कारणीयं शत्रुत्वमित्यन्वयस्याशासंभवात् सद्भावस्नेहाभ्यां कारणीयस्य मित्रत्वहृत्पादेवा व
यं तु त्वत्सदृशा पदे विशदृशो लक्षणा तथा च ताभ्यां कारणीयस्याविसदृशा वेपरीतमाचरितमित्यर्थः। एवं च साधयंतीत्यत्रापि रम
यंतीत्यर्थः मम त्वत्रापि समुत्वत्येत्यर्थः तथा च विसदृशं महत् क्षणं तदेव विरुद्धस्य दर्शयति मत्प्रियमित्यादिनेति न किंचिदनुपपन्नं
तत्व्यंग्यमाहते न चेति कामुकेत्यैकशेषः। कामुकीकामुकयोः मापएधत्वमियं चकाशयतीति। तिसामाजिके व्यंजनया। सवाम्य
ते इत्यर्थः दूरतात्वावयोरित्येवमवगम्यते॥ उच्चस्मि चेतेति उहनिस्खलन निष्पंदा विसिनीय त्रेराजते वलाका। निर्मलमरक

त्माजनपरिस्थितानां खेछक्तिरिवेइतिसंचरहेतिपद्यस्यार्थः निश्चलेतिसंबोधनं यां खमुक्तिः शं खकपालं चक्रवर्तीत्युनि

श्चला पृथिवीसेव निष्पंदेत्यर्थः इत्याह तत्र पृथिवीवाचकस्याचलापदस्य परिवृत्त्यक्षमतया निष्पंदाद्यचितानेत्रदृंदृंवोक्षयस्य

यतमित्यत्र दोषो ह्यासे ग्रंथकृतैव स्वयं वक्ष्यमाणत्वात् तत्रस्मयानिश्चलनिष्पंदत्वेत्यात्तत्वमित्येव ग्रंथकृता लिखितस्यात्र

तुनिष्पंदत्वेनेति। अतः शंकेतितेनेतिद्व्यनेव्यञ्जते अत्रैव कंपान्तरमाह अथ चेति तथा चाहं तत्रगतात्वामनास्यामतोस्मीनिपद्द

दस्तितक्तियोस्यार्थः॥ मिथ्यात्वं विवृणोतिनत्वमितियदित्वं तत्रगतः स्यात्तदावलोकाख्यास्त्वस्थानस्यादितिभावः। वाचकादीनामिति

शक्त्यादिनाप्रतिपादकानामित्यर्थः स्याद्वाचकइत्यादौ तत्प्रवोपक्रमस्य प्रागदर्शितत्वात् तथानैरथीनप्रतिपत्तिकत्वेपशक्त्याप्रतिपाद्यत्वं

तथाचलाक्षणिकादीनामपि परस्परपर्यायशक्त्याप्रतिपादकत्वेनतेषां तथात्वं मित्वमित्युत्तरग्राहकंलक्षणं वक्तुमाह स्वरूपमिति स्व

रूपंलक्षणं तथा च शक्त्याप्रतिपादकत्वं यल्लक्षणावच्छेदकं तद्ग्राहकंलक्षणमाहेत्यर्थः साक्षादिसादि अत्र शंके तदशहान्तद्व्याहाती

त्यर्थकी धितततः कर्मीनक्तः तथा च संकेतग्रह विषयमित्यर्थः ग्रहेचसाक्षात्वविशेषणं तथा च साक्षाद्ग्रहविषय स्वसंकेतयमर्थं

यस्य शब्दोऽभिधत्ते सत्तस्य वाचक इत्यर्थः। वाचक इत्यस्य शब्दो प्रतिपादक इत्यर्थः उपक्रमा वाधया अख्यानत एव यदि च वाचकसं
१८ ज्ञक इत्यथा वाचकसंज्ञकत्वमेव लक्षणतावच्छेदकं स्यात्तदयो यमर्थमभिधत्ते अभिधया प्रतिपादयति स तस्य वाचकसंज्ञक इ
18 त्यतावत्तेव्वसमञ्जसे दोषद्वयं यथ्थास्यात्तद्वयं दर्शिता नकांक्षायाया भक्त्या प्रतिपादकत्वमेव लक्षणतावच्छेदकं तथात्वे च यया भक्त्या प्रतिपादक,
यदि तं लक्षणं न स्यात्ते लक्षणतावच्छेदकलक्षणयोर्द्वयो रपि शक्त्या प्रतिपादकत्वरूपत्वे आत्माश्रयापत्त्याशङ्क भावात्प्रपन्ने:
एवं चाभिधत्त इत्यस्याऽपि अभिधया प्रतिपादयतीति नार्थः तथैवात्माश्रयात् किंतु प्रतिपादयतीत्येवार्थः तथा च यो यमर्थं प्रतिपा
दयतीत्येतन्मात्रं कारतो व्यंजनया अशक्यार्थप्रतिपादकेऽपि तद्वाचकतापत्त्या संकेतितमिति संकेतग्रहविषयमित्यर्थः संकेतग्र
हेति व्यंजनानुग्रहीतेव नोऽधिकेति नोक्तातिव्याप्तिः तथापि लक्षणारूपवृत्तिग्रहविषयस्य लक्ष्यार्थस्य प्रतिपादके लाक्ष
णिकशब्देऽतिव्याप्तिः स्यादिति वृत्तिग्रहे साक्षात्वं विशेषणं लक्षणारूपवृत्तिग्रहस्तु मुख्यार्थः गङ्गादिग्रहव्यवधानादेवेति तद्वार रम॰
णं तथापि तीरशब्दस्य साक्षाद्गृहीतसंकेतस्य तीरस्य लक्षणया प्रतिपादके गंगाशब्देऽतिव्याप्तिः स्यादित्यतः साक्षाद्गृहीत अ संकेतमित्य १८

सर्थीकृतंगंगापदंस्वसंकेतस्तत्तीरेसाक्षाद्गृहीतइतिनतत्रातिप्रसंगइतिनचसंकेतशक्तिरेवोवृत्तीतथाचगृहीतस्वश
क्तिकंयमर्थंयःप्रतीपादयतीत्येतावन्मात्रकं१।एवंलाक्षणिकंवार्य्यतामितिवाच्यंअर्थंगृहीतस्वशक्तिकत्वग्रहदशा
यामेवशाब्दधियांतात्तदर्थप्रतिपादकत्वस्यलक्षणावच्छेदकस्यग्रहेणानुल्लासमितिवेयतयालक्ष्यमात्रावच्छेदकलक्षणायोग्या
त्ययाहकाभावादनुपपत्तेसंकेतपदस्यवृत्तिपरत्वेतुनयात्ययाहकाभावादनुपपत्तिःअर्थंगृहीतस्ववृत्तिकत्वग्रहदशायांशाब्देपि
वृत्त्यातदर्थप्रतिपादकत्वस्यैवग्रहात्तत्रनतुःयाततान्त्रचसंकेतितमर्थंयःसाक्षात्प्रतिपादयतीतिकेचिद्व्याचक्षतेतत्रलाक्षणि
कशाब्देगतिव्याप्तिःतस्यसंकेतग्रहएवमुख्यार्थबाधादिव्यवधानानुगुणपदार्थप्रतिपादनवृत्तिग्रहोपिप्रमारूपएव
वोच्यःतेनशक्तिभ्रमगृहीतमर्थंप्रतितवाचकतापत्तिः।इत्थंगृहीतसंकेतादेवशब्दोर्थोप्रतिपादकप्रतिपाद्यादित्याभि
प्रेत्यलक्षणोहक्तेऽर्थप्रत्ययात्तसंकेतग्रहावश्यकत्वप्रमाणंदर्शयन्लक्षणमाचष्टेइहेतिसंकेतसहायोगृहीतस
केतसहायः॥संकेतितस्चतुर्भेदइतिसंकेतितोऽगृहीतसंकेतःचतुर्भेदश्चतुरूपःरूपचतुष्टयमाहइत्यादिइतिप्र

त्तिग्रणात्क्रियापदस्थोपाधिरूढ इत्यर्थः व्यक्तौ रेव संकेतितत्वमुचितमित्याशंक्य निषेधइतियद्यपीति अर्थः प्रयो
जनेहलवाहनादितस्मै क्रियायागवादेर्यानयनादितत्कारित्वेनेत्यर्थः आकृतिर्गवादिः तथा च तत्रैव संकेतग्रहइ
१९ 19 ति वक्तुमुचितमिति पूरणीयमतस्समधत्ते तथापीति नतु नानंतव्यक्तिषु संकेतग्रहः किंतु दृष्टव्यक्तावेवेत्यत
आह व्यभिचारादेश्चेति संकेतग्रहकालादृष्टव्यक्तावपि बोधस्य कार्यस्य संकेतग्रहरूपकारणाव्यभिचारादित्य
र्थः। कर्तुमितिव्यक्तावेव संकेतो बालकेन गृहीत इत्यर्थो यथा वाग्विषयः कर्तुमित्यर्थः ननु बालकेनाज्ञातमित्य
र्थः तद्व्यक्तौ शक्तिग्रहकाले बालकस्य व्यभिचारानुपस्थितेतं तद्व्यक्तिशक्तिग्रहे व्यभिचारोपस्थितेव बाधकत्वा
च्च नन्नेकव्यक्तिशक्तिग्रहे विव्यक्त्यंतरबोधं जनयतीत्यतो न व्यभिचारान चातिप्रसंगः शक्तिग्रहप्रकारीभूतध
र्माश्रयस्यैव बोधेनातिप्रसंगाभावादित्यत आह गोरितिव्यक्तावेवेतेत्वादिपदं च तदृष्टस्य शक्तिग्रहे तैस्तद्बोध रा.म.
नेऽनुभवविकोतितिविभिन्नप्रकारकत्वरूपो विषयाविभागो नस्यादित्यर्थः नशक्नोतीत्यत्र स्वसत्तामितिदोषः भव १९

स्वार्थो वात्र प्रामाणिकः नचैकस्यामेव व्यक्तौ पदद्वयस्य येन प्रकारेण शक्तिग्रहस्तेनैव प्रकारेण स बोधं जनयतीति
न विषयविभागानुपपत्तिरिति वाच्यं तन्मते व्यक्तौ शक्तिग्रहस्य निष्प्रकारकत्वादेवान्यथा प्रकारांशेऽपि शक्ति
ग्रहस्य हेतुताविषयत्वाभावेन तन्मात्रशक्तिग्रहादेव बोधोपपत्तावाक्षेपणालभ्यायां व्यक्तौ शक्तिग्रहगौरवं वैयर्थ्यञ्चा
स्मात् एवं च निष्प्रकारकशक्तिग्रहाभ्युपगमे व्यभिचारोऽप्यवारित एवेत्यपि बोध्यं तदुपाधावेवेति तत्स्वव्यक्तिरूपाश्रौ
प्रकारीभूतधर्मे संकेत इति गृह्यत इति शेषः तथा चोपाधिशक्तात्पदादुपाधेस्तद्व्यक्तेश्च स्मृतिः शाब्दानुभवश्चेति भा
वः स्वशक्याया अपि व्यक्तेः स्मरणमेवाक्षेपः न च व्यक्तेः शाब्दानुभवमात्रमेवास्तु किं स्मरणांगीकारेणेति वाच्यं गोत्वप्रकार
कव्यक्तिस्मरणाभावे गोविशेषणकशाब्दबोधानुपपत्तेः गोपदाद्गोत्वेनाश्वस्य मात्रोपपत्तेश्च गोत्वाश्वरथी विनाभावा
भावेनात्र भावनरूपाक्षेपासंभवाच्चोक्ताविनाभूतगोस्मरणांगीकारेऽनुभवस्यैवाश्वेन तदभेदारोपः तदुक्तं जातिशक्तं पदं
व्यक्तिमपि स्मारयत्यत्र भावयति चेति तत्र च जातिपदं तद्व्यक्त्युपाधिपरमेव जात्युपाधिचतुष्टयं विभक्तविभागेन

दर्शयति उपाधिश्चेति वस्तुधर्मो। वस्तुनि व्यक्तावेवानारोपितधर्म्मः सव्यक्तिवृत्तिजातिगुणक्रियारूपः वक्तृय
२० दृच्छेति स्वारासेकीइच्छा यदृच्छा तया प्रवृत्ता यदृच्छा डित्थादीनां स्वरूपो धर्म्मो वक्त्रा पित्रादिना संज्ञित्वेनारोपित इत्यारोपि
40 तइत्यर्थः वस्तुधर्म्ममेवाद्वेधा विभजति सिद्धइति नित्यइत्यर्थः सचजातिगुणरूपः तन्मतेपि गुणस्यापि नित्यत्वाएव
आविर्भावतिरोभावावेवउत्पत्तिविनाशविषयाविति साध्यं जन्यः। क्रियारूपः सिद्धमेवपुनर्विभजति सिद्धोपीति प
दार्थस्यव्यक्तेः प्राणोहानोपादानव्यवहारः स्वज्ञानेनतस्य इत्यर्थः सचजासाधस्त्वं डधर्म्मितावच्छेदकरूपः गोत्वे
दंडित्वादिधर्म्मितावच्छेदकग्रहं विनागोरूपधर्म्मिणोहानोपादानव्यवहाराभावाद्विशेषाधानं न तादृशज्ञातोपाहृत्तबुद्धिः
तद्धेतुः शुक्लादिगुणरूपइत्यर्थः। यद्यपि गोत्वादेरप्युत्वादिव्यावृत्तिबुद्धिजनकत्वमस्ति तथापि न तत्प्राणप्रदत्वम
पि किंतु शुक्लादौ तु विशेषाधानमात्रमतो विशेषाधानमात्रमतो हेतुश्चेत्यर्थः न च शुक्लत्वव्यक्तेर्हानोपादाने धर्म्मि गम.
तावच्छेदकतया शुक्लत्वमपि प्राणप्रदमेवेति वाच्यं तद्देवताय विषयकशुक्लत्वाज्ञानेनशुक्लादेर्हानोपादानव्य २०

वहारानभ्युपगमात् अशक्यत्वाच्छुक्लमानयेत्यत्र तथात्वापि शाब्दमितिकहानोपादाने इदंत्वादिधर्मितावच्छेदकमेव
शाब्दं शुक्लत्वं तु तत्र विशेषाध्यायकमेव इदंत्वादिकं तु नैव मितिस्वभिप्रायात् अध्याध्याजातिरिति अत्र एवंडोपाधि
रित्यर्थः वाक्यपदीयं वाक्यपदविवेचको यथ विशेषः नाप्यगोरिति अगोव्यवहारोपीदंत्वेनैवोपस्थिते गोरूप
धर्म्मिणीत्यर्थः गोत्वाभिसंबंधादिभिर्गोत्वादिधर्म्मितावच्छेदकविशिष्टज्ञानादित्यर्थः गोरितीतिव्यवहार्य्य इतिशे
षः शुक्लादीनां हीति शाब्दबोधेन लक्षसत्ताकं व्यवहार्यतापन्नं वक्ष्यमाणशुक्लादिना विशिष्यते स्व अशुक्लादितो व्यावर्त्तने
साध्यत्वरूपमाह साध्य इति पूर्वापरीभूतांऽवयव एकदेशो यस्य तादृशक्रीयासमुदायरूप इत्यर्थः पूर्वापरीभूतक्रियाधावयो
मेव पाकादिपदप्रयोगात् वक्तृमद्दृष्टसन्निवेशितरूपमनुपाध्यदर्शयति द्विस्थादीति वक्ता पित्रादीनां द्वित्वादिव्यक्तिरूपेषर्थे द्वित्वा
दिसाहाय्यानां स्वरूपं पंच दृष्ट्या सन्निवेश्यतेत्यारोपितं । यतेइत्यर्थः तादृशस्वरूपस्य चक्रमिकानेकवर्णघटितत्वेनाशुविनाशिक्रमिक
तत्तद्वर्णज्ञानमेलकाभावात् तद्बोधोपायपूर्वोक्तस्मार्यमित्यत्र स्वरूढीतिद्वंस्य बुद्धिविषयपर्यंतपमित्यर्थः तत्रतेनापि वर्णक्रमेने

वर्ण्यं जनेनैवात्र पपन्ति । रित्याह संहतेति एकत्वानेनैव विवक्षितमित्यर्थः । चक्रवर्त्तीत्वं समवुद्धिः पदद्वयस्याक्षानत
२१ रोऽसन्नावुद्धिपदार्थस्मृतिस्तन्निर्गीत्यर्थात्यमित्यर्थः पदसेवाच पदार्थत्वात्तथा सहतत्क्रममीश्वरप्रयोगाय भूनाप्रयोगरूप
21 क्रमसहेतं माधुनिकप्रयोगरूपलोदितिव्याचष्टे तत्रगतकथनस्य रूतात्र यत्रुक्तात्स्यसंज्ञारूप इतितथा च मादृशीशक्तास्व
कावेति उक्तं । धर्मित्वात्क्षेपामेवलाभ इति भावः यद्यपि समवायिसमवेतयोरेवाविनाभावः स एव चाक्षेपहेतुरन्यथा गोप
दादगोरप्याक्षेपप्रसंगात्तथाप्यविनाभावोऽसत्वेव वक्त्रायदृच्छयाप्यारोपितोधर्मोक्षेपहेतुः । रीतिवोध्यपदृच्छात्मक इतिय
दृच्छयाप्यात्मायस्येति विग्रहः संज्ञायायदृच्छारूपत्वाभावात्स्य वृत्तिरिति प्रवृत्तिविषयः परमाणवादिशब्दानांप्रवृत्तिविषयसंशयं नि
वस्यति परमाणवादीनामिति परमाणुत्वादीनामिति भावः । आकाशमहदीर्घह्रस्वं चेति परिमाणाणुत्वामध्येपठितत्वात्तस्य परिभाषा
सिद्धमेव तेषांगुणत्वं प्रमाणानां तरंनपेक्ष्यतइत्याह पारिभाषिकमिति न तु गुणक्रियारूपोपाध्योः शक्तियहाभ्युपगमेपितेषामे राम.
वप्रवृत्तिनिमित्तिनानात्वाद्देवेवानंत्यव्यभिचारादिरूपतत्राह गुणक्रियेति जातिवदेऽप्यनेकाश्रया एकैक एवेत्यर्थः । यद्यप्येवसिद्धं २१

तेक्षिपापाश्चपि नित्यत्वमेव सेत्स्युमुचितं तथापि महाप्रलयपरमाणूनामपि निष्क्रियत्वाद् नित्यत्वं यदृच्छायदृच्छोपाधिश्चा
नंत्वनभेदाद् इति आलंबनत्वेन ज्ञानभेदादित्यर्थः खड्गादेर्विकृतो मुख्याध्यासत्वाभावात्। जातिरेवेवेति मतं व्याच
ष्टे हि मयपय इति अभिन्नाभिधानमभिन्नशब्दप्रयोगः अभिन्नप्रत्ययः एकाकारप्रत्यक्षं पाकादित्वं पाकत्वादिः एवं डित्थादि
शब्दनिष्ठामेव जातिमादायोपपादयति बालवृद्धेति डित्थत्वादिजातेरेतेकव्यक्तिवृत्तित्वोपपत्तये बालाद्यवस्थावपि तस्याभेदे
न डित्थादिशब्दानामनेकत्वमुपपादितमनेन शब्दवृत्तिजात्या ततत्समवायिपिण्डस्याह्नेयसंभवेपि प्रकृष्यमाणनतंभवदित्य
तः प्रकृष्टवृत्तिमेव जातिमुपपादयति प्रतिक्षणमिति नानारूपेषु डित्थत्वानुपलंभेपि एकस्येव प्रकृष्यस्य अवस्थाभेदा
त् अनेकत्वमुपपादितमनेन। प्रतिक्षणं प्रत्यवस्थाकालक्षणभंगवादे तु क्षणरूपविशेषणाभेदाविशिष्टभेदः डित्थत्वमि
ति क्लिष्टपाठेन शब्दतदर्थजातिद्वयमुक्तं अस्यां सर्वत्र जातिमुपपाद्य सर्वेषां शब्दानां तन्नैकमाकृतिः पाहसर्वेषामिति जा

२२ ॥तिरेवेत्यत्र जातिपदमखण्डोपाधिपरं तेनाकाशत्वाभावत्वादिपरिग्रहः एवं च मुख्यपदाच्छक्यत्वआसाश्रयस्य मुख्यग्रण
से वाक्षेपः पदादिपदत्वे तुल्यसंयोगे वेति मंतव्यं न तु न स्वाक्षेपः स्वसमवायिसमवायिसमवायिनोऽप्याक्षेपे गोपदादेः श्वावयव
साक्षेपापत्तेः। प्रवृत्तिनिमित्तं प्रवृत्तिविषयः तद्वान्तितिनैयायिकमतं शब्दकारी भूत धर्म्मविशिष्ट इत्यर्थः अयो दह इति बोद्धम
तं अयो दहो अनयोर्हि वृत्तिः मद्ध्यर्तिकान्विकायामेव हृद्यतीत्युदाहृतमेव॥ मुख्यार्थबाधइत्यादिलक्षणालक्षणां खण्डयति मुख्येत्वं
दर्शयति मुख्योऽर्थ इति व्यापारो वृत्तिः मुख्यार्थोऽप्यजहत्स्वार्थलक्षणारूपोपादानलक्षणात्वान्न द्वारणाय व्यापारे मु
ख्येत्वापादानं तस्य मुख्यत्वं च व्यापारान्तरवाधं विनैव कल्प्यमानत्वं स्वव्यापारः स्वत्रुतक्रियायामेव कल्पना॥ लाक्ष
णिकशब्दं निरूपयितुं लक्षणां निरूपयति मुख्यार्थबाधइत्यादि अत्राहु केचित् कथनेनयात्वापादनास्यार्थात्मिकालक्ष ए म०
णायाः सिद्धिः यदि स्वव्यपदेशे सार्थकं हन्त स्यैवं तथा च मुख्यार्थबाधे मुख्यार्थयोगे च ज्ञाते सति हठाज्ञानाद्युक्तपदेपक्ष २२
पाऽशाक्यपदप्रयोगसामान्यतः सविशेषप्रयोजनकत्वज्ञानाद्धाज्ञातपापपापस्वासाऽन्यामुख्याभिन्नोऽर्थो लक्ष्यते प्रतिपाद्य

नेमवृत्तिर्लक्षणोऽसमर्थः सचारोपितापुरुषेण लक्ष्यार्थविषयतयाऽज्ञानिनामस्वतानासमर्थ्यात्मिका क्रियावृत्तिः शक्तिः ।
स्त्रीभ्यश्चेच्छात्मिकाऽन्या वानिस्ससिद्धान पुरुषेणारोपिता यदिस्सस्यप्रये समर्थकत्वं दर्पणोपि व्यक्तं यथामुख्योर्थवा
धेन योगेन यान्योर्थः प्रतीयते । रूढेः प्रयोजनाद्वापि लक्षणाशक्तिरर्पितेति । तत्र च यथा शक्तिर्वृत्तिः । स्वर्पितापुरुषेणारोपि
ता इत्यर्थः रूढितोऽर्थेति अथवे समर्थोऽथेति कश्चिन्नरूढिज्ञानात्कश्चित्प्रयोजनज्ञानादित्यर्थः मुख्यार्थबोधस्य मुख्या
र्थस्य समभिव्याहृतपदार्थे अन्वयबाध एव पदार्थस्य कश्चिदपि बाधाभावान्मुख्यार्थेऽन्वयबाधोपितासमर्थ्यविषयस्या
न्वयस्य मुख्यतावच्छेदकरूपेणानिर्वाह एवं गंगायां घोष इत्यादौ तात्पर्यविषयस्य तीरे घोषान्वयस्य मुख्यतावच्छेदके
न प्रवाहत्वेनानिर्वाहात् एवं छत्रिणो यान्तीत्यत्र छत्र्यछत्रिणागमनान्वयस्य तात्पर्यविषयस्य छत्रित्वेन मुख्यतावच्छे
दकरूपेणानिर्वाहात् एवं कुन्ताः प्रविशन्तीत्यादौ कुन्तिनः प्रवेशान्वयस्य तात्पर्यविषयस्य मुख्यतावच्छेदके न कुन्तत्वे
नानिर्वाहात् मुख्यार्थान्वयमात्रबाधविवक्षणे तु छत्रिकुन्तयोरपि गमनप्रवेशान्वयात्तत्र मुख्यार्थान्वयबाधाभावेनाव्या

त्तिः स्यादिति। तात्पर्य्यविषयान्वयाविवक्षणेऽपि जन्यैवाप्तिः स्यात्। नाक्षत्रित्वेन कुन्तत्वेन चान्वयावाधात्। किं तु तथात्वे
२३ 23 नान्वयस्यास्तात्पर्य्यविषयत्वाच्छत्रिणार्थवाहिनां कुन्तिनां चान्वयस्येव वचनतात्पर्य्यविषयत्वात् तादृशान्वयस्य चावाधे
ऽपि मुख्यतावच्छेदकेन छत्रित्वेन कुन्तत्वेन चानिर्वाह एवेति मुख्यतावच्छेदकेनेत्युपात्तं ईदृशमुख्यार्थवाधज्ञानेऽपि
यत्र लक्ष्यार्थे मुख्यार्थसंबंधानुपस्थितिः तत्र गतो। तत्पुरुषतात्पर्य्यस्यानकविषयोऽप्यलक्षणात्वं किं तु वक्तुः सामर्थ्य
बोधिकामेयार्थलक्षणे वक्ता तथात्वं च दोष एव लक्षणेन तद्वारणाय तद्योग इत्युपात्तं अनेन मुख्यार्थयोगस्य लक्ष
णाज्ञापकत्वशक्यसंबंधो लक्षणेति नैयायिकमतमुपेक्षितमिति बोध्यं तदुपेक्षाबीजं च शुक्लगुणसमवायस्य
लक्षणात्वे पटमात्रवृत्तेस्तस्य शुक्लगुणवृत्तित्वेन लक्षणायानुपपत्त्यापत्तिस्तस्य शुक्लगुणस्य शाब्दबोधानुपपत्तिरे
व न हि शुक्लगुणसमवायाच्छुक्लगुणे। रूढिप्रयोजनान्यतरज्ञानं विना ज्ञानमपि वक्तुस्तात्पर्य्यमेयार्थलक्षणे वइ एम०
ति तद्वारणाय रूढिरित्यादि इदं लक्षणाज्ञाने त्वपंक्रमः प्रथमं तात्पर्य्यघटितं निरूक्तमुख्यार्थवाधयहस्तत्र तज्ञास्य २३

र्थग्रह एव तादृषपदीवादेवप्युपस्थितिस्तत्तस्मिन्नर्थे मुख्यार्थयोगग्रहस्ततस्तस्मिन्नेतच्छब्दस्य मूर्द्धियोगरूपा
पार्थेज्ञानात्प्राक्पदोपेक्षया अशाक्यपदद्वयोगस्य विशेषप्रयोजनकत्वज्ञानात्तानास्मिन्नर्थे वक्तृतात्पर्य
[redacted] रूपलक्षणा गृह्यते इति। अस्मार्थे इति अत्रापि मुख्यमात्रावच्छेदकान्यधर्म्मावच्छिन्नवृत्त्यैवार्थः। तेन विशे
षपदस्य सामान्यशब्दस्य लक्ष्यार्थे विशेषेऽन्यतोऽपपत्तिः। न च कालिकायां यदि सैवास्ति वृत्त्या उपलक्षते यदि सैव व
क्ष्यति अतो लक्ष्यतेऽस्मर्य्यते तादृशी स्मृतिरेव लक्षणा सा चानुमाविकैव न स्मारिकेति किं न व्याप्यते अत एव शाका
द्शाकोपस्थितिर्लक्षणेति जरन्मीमांसकमतमिति वाच्यं लक्ष्यार्थोपस्थितेरेवात्र लक्षणात्वे तस्या अज्ञातायाः एवा
त्रानुभावकत्वमवश्यं वाच्यं तज्ज्ञानस्यानुभवबाधितत्वात् तथा च शक्तिरेव ज्ञाता वृत्तिर्नमा अंजनाया अप्यज्ञाता
या एव बोधकत्वात् तथा च साक्षात्संकेतितयोऽर्थमभिधत्ते इत्यादिवाचकलक्षणो साक्षात्पदद्वये व्याप्या नात्र अस्साक्षात्कृ
हीतद्वृत्तितत्वराभावात् शाब्दार्थसाधारणपदार्थोपस्थितिमात्रस्यैव शाब्दबोधजनकत्वेन फलविशेषजनिकायास्तस्य

उपस्थितेर्लक्षणात्वेन कारणताकल्पनाभावात् तदुपस्थितलक्षणावादस्य हेयत्वेन तन्मताभिप्रायेणास्य लक्षणा
२४ 24 स्यास्याक्षेपत्वाच्च अतोऽस्यायमेवान्वयस्तदंशयेस्यर्थकं ।। रूढिहेतुकायाः प्रयोजनहेतुकायाश्च उदाहरणद्वयमे
कदेवदर्शयन्नत्र लक्षणास्यार्थं घटयति कर्म्मणीति लोकिककुशग्रहणयोग्यकर्म्मणि स्यर्थः ना आदाने इति धा
त्वर्थानुसारेण कुशलपदं कुशग्राहिणि शक्तं दक्षे तु लाक्षणिकमिति वैयाकरणाः तन्मतेऽवयवसमुदायाभ्यां विभि
न्नार्थबोधकस्य शब्दस्यावयवलभ्यार्थे शक्तिः । समुदायलभ्यार्थे रूढिहेतुलक्षणा पंकजपदं तु अवयवसमुदायाभ्यामे
कस्यैवार्थस्य बोधकमिति लाक्षणिकं किन्तु योगारूढमेव तत्र रूढ्यतीस्यर्थज्ञापकस्यायां तगमिनासाधितमपि गोपदं न गम
नाविशिष्टमात्रे शक्तं किन्तु सुस्नेगव्यविद्रणादिप्रत्ययानानां व्युत्पन्नेनैः शाब्दिकैरभ्युपगमात् अत्र तन्मतारूढेन
रूढिहेतुकमाह कर्म्मणीति कालिङ्गः साहसिकः इत्यादिकं तु सर्वमतसिद्धं रूढिलक्षणोदाहरणम् अवयवलभ्यार्थ
मात्रे शक्तिस्वीकारे तु मण्डपकुण्डलपदयोरपि मण्डपानकर्तृकुण्डग्राहिणोरेव शक्तिः गृहविशेषभूषणविशेषयो

क्तलक्षणोवस्मात्मुख्यार्थस्यबाधइत्यनेन दूषणो मुख्यार्थबोधं दर्शयित्वा तद्योर्लक्ष्यार्थेमुख्यार्थयोगंदर्शयति वि
वेचकलोद्दोसमीप्येचेति यथासंख्यमुभयोः संबंधद्वयमिदंबोध्यं कुशोस्याटनादिसुसुकार्येभद्राभद्र विवेचका
येकधर्मीवत्वंकुशयाहिद्वसायोः संबंधकुशलपदेनलक्षणाहेतुरूढिमाहरूढितइतिततद्विरणांप्रसिद्धेरितिभू
रिप्रयोगएवप्रसिद्धिः गंगायांघोषइत्यत्रलक्षणाहेतुप्रयोजनमाहगंगेतितथानप्रतिपत्तिरूजःकालेनप्रतिप
त्तिःतथाप्रतिपादनात्मनःउत्तरकालेप्रतिपादनात्मनप्रयोजनादित्यत्रतातादितिशेषः तज्ज्ञानंचरहदंसविशेषप्र
योजनकमित्येवंसामान्यजनवत्तिपिषयावनत्वादेर्लक्ष्यार्थज्ञानेनज्ञानमेवज्ञानानामरूढिहेतुकायांतुरूढिज्ञानादेरस
प्रयोजनकत्वज्ञानं। मुख्येनेतिवाधितान्वयप्रतियोगितयाउपस्थितेनमुख्यार्थेनकारणभूतेनशब्देनैवलक्ष्यत
इत्यर्थः आरोपितंवंकृपरूपेणोत्यर्थः व्यापारोवृत्तिः सांतरेतिमुख्यार्थवाधप्रयुपस्थितिव्यवधानेनोपस्थितलक्ष्या
र्थविषयतयासंबंधेनास्थितइत्यर्थः॥ इदंलक्षणासामान्यस्यलक्षणमुक्त्वा तद्विशेषानाह मुख्यस्येत्यादि स्वस्वीय

मुख्यार्थस्य विवक्षितरूपेणान्वयत्वस्य सिद्धये बोधाय परस्य मुख्येनावछेदकान्यधर्मावछिन्नस्याक्षेपः स्वस्यये

२५ 25 नंययेति शेषः सा उपादानं नाम लक्षणेति स्वयासंत्वमत्रयः मुख्यार्थ उपादीयते अन्वयप्रतियोगितया स्वज

न्यधीविषयीक्रियते अतेनेति करणाप्रतिज्ञत्वसा अजहत्स्वार्थाइयं लक्षणेत्यर्थः इयमेवार्थान्तरसंक्रमित

वाच्यलक्षणा चेति वक्ष्यते एवं च परार्थस्यैव शक्यतावछेदकातिरिक्तधर्मेनोपस्थापने पराक्षेप उपपन्नः अ

न्वयासिद्धये इत्यत्र विवक्षितरूपेणेत्यस्य करणाछत्रिणो गछंति कुंताः प्रविशंति इत्यादावछत्रिकुन्तस्तोपाक्षेपं वि

नापि छिंतिकुंतयोरन्वयासिद्ध्यापराक्षेपस्य त्वसिद्ध्यर्थकत्वाभावात् असंभवापत्तिः विवक्षितरूपेणानयत्व

नतदाक्षेपं विनेत्यदोषः परार्थे स्वसमर्पणमिति स्वं स्वार्थत्वं परार्थः स्वाशक्यार्थः तत्र स्वसमर्पणं तन्मात्रे स्वार्थतास गम॰

मर्पणमित्यर्थः अत्रापि ययेति शेषः सा लक्षणं नाम लक्षणेत्यर्थः । न तूपादानलक्षणावत्स्वार्थो विप्रतिपाद्यतारूपास्वा २५

र्थता इत्यर्थः गंगायां घोष इत्यादौ घोषान्वयार्थं तीरप्रतिपादने स्वार्थस्य गंगापदस्य प्रतिपाद्यत्वात्तद्बोधार्थमेव तदुपस्थापकता

न्स्याप्तिद्वये इत्युपादानलक्षणामुदाहरणप्रदर्शनेन व्याचष्टे कुन्ता इति कुन्ता इति कुन्तादिभिरिति वाधितान्वयप्रतियोगि
त्वेनोपस्थितैः कुन्तादिभिः करणभूतैः शाब्दैरेव तत्संयोगिनः पुरुषा आक्षिप्यन्ते लक्ष्यन्ते इत्यर्थः। तदुपादानेनेति तत्स्मात् पादा
नेन मुख्यार्थोपादानेनेत्यर्थः प्रवेशान्वयार्थं कृतवत्तउपस्थापने कुन्तस्यापि तदर्थमुपादानात् उपादानेनेत्यत्र भावे ल्युट्। उपादा
नमित्यत्र तु करणे। ननु धर्म्मकुन्ते शक्तस्य कुन्तपदस्य धर्म्मिणि कुन्तिनि लक्षणोत्पन्नं तल्लिंगसोमयागे प्रयुक्तो गो एवं प्रपञ्च इत्यत्रैव
गोपदं तदुदाहरणं नोक्तं तत्राप्रियोगत्वे शक्तस्य गोपदस्य गविलाक्षणिकत्वादित्याशङ्क्य निषेधयति गोरनुबन्ध्य इत्यादिना नोदाह
र्त्तव्या इत्यन्तेन लौकिकशब्दापेक्षया वैदिकशब्दानुधावनं निष्प्रियप्रामाण्यकत्वात् तत्र वाक्यशक्तिराक्षिप्यते इत्यन्तेन लक्षणाप्रसञ्जनं
आक्षिप्यते लक्ष्यते इति तद्वार्थः कथं मत्सादि इतिप्रापित्वेनाध्याप्तिनायागोत्वजातेर्वयं भावनाकारजात्या इति वाधितान्वयप्रतियोगि
त्वेनोपस्थितया जात्या करणभूतया शब्देन व्याक्षिप्यते इत्यर्थः। इत्थं लक्षणामाशङ्क्यात्र तात्र शक्तिप्रसक्तिं निवारयति नत्विति प्रथमं गो
शब्देन शक्त्या गोत्वमुपस्थाप्यते येव शक्त्या गोरनुपस्थाप्य इति शक्तिप्रसक्तिप्रसङ्गान्निरासे हेतुमाह विशेष्यमिति अभिधा श

क्तिविशेष्यगवादिधर्म्मिणां न गच्छेत् नोपस्थापनार्थप्राप्ते।र्जियतो विशेषणे गोत्वादावुपस्थापितेऽपि शक्तेः सीराणसाम
२६ र्थ्याच्च बुद्धिकर्म्मणां विरम्य व्यापाराभावेन तस्य हेतुत्वात्तेषां च सम्बन्धबोधकत्वाभावाद्विशिष्टशक्तिर्वैशिष्ट्यातयोपियाक्त
26 म्युपगमाद्गोत्वादेर्वानवाच्यत्वमिति भावः। इत्युपादानेति इत्येवं वीत्यापसंजितागोत्वंबध्य इत्यत्रोपादानेलक्षणानुनोदाहर्त्तव्येत्यर्थः
तत्रहेतुमाह नत्यत्रेतिनवेतिनचगोशब्दस्य गवि मूर्विप्रयोक्तृपारूढिरस्येव तत्कथमिदमुक्तं। अत्र च रूक्रवर्त्तीचाधुनिकदेवदत्तादि
पदे रूढिर्नास्तीत्यर्थ इत्याह तत्रगवादिपदे रूढिमत्त्वानिवासात् अत्रोच्यते नयारूढिरेवेत्यनुक्त्वा नवा रूढिरियमित्युक्ते अयमभिप्रा
यः लक्षणाहेतुरूढिः। न मूर्विप्रयोगमात्रं किंतु लक्ष्यार्थविनिर्मुक्ते केवलशक्यार्थे विप्रयुक्त्या मणा इत्यस्य लक्ष्यार्थे भूरिप्रयोग एव लक्ष
णाहेतुरूढिः यथा केवलदेशविप्रयुक्तस्य कलिंगशब्दस्य तद्देशस्थपुरुषे भूरिप्रयोगः। गोपदस्य तु गवेन तादृशीरूढिः केवलं गोत्वे गोश
ब्दप्रयोगाभावात् तर्हि कथं गोः प्रतीतिरित्यत्राह व्यक्तेरिति। वेनेति उपस्थितयाजान्याकरणपूर्वतया शब्दे नैव व्यक्तिशक्तिसिद्धत्वेसमर्थ्य राम
ते अत एव भाष्यते वैत्यर्थः। जातेः कारणतावनत्समरणात्वारैवव्यक्तेः स्मरणादनुभावनाचेत्येतत्त्रयमुपादानशब्दार्थः कार्यो विशाह २६

बोधविषयइत्युक्तंतत्रकर्तृत्वमित्यत्राहयथेतिक्रियतामित्ययंत्रप्रत्ययार्थःकर्मकर्त्रोरध्याहारःतम्यकृत्इत्यत्र
तुकर्म्मार्ध्याहारस्तम्यमंयथातद्वयमुपात्तशब्दइत्यविषयमपिशाब्दबोधविषयस्तथागवादिव्यक्तिरपीत्यर्थः।कर्मला
दिसामान्यरूपेणाध्याहारंदर्शयित्वाप्रावेशोतिप्रविशेत्यत्रगृहंपिंडीमित्यत्रभक्षयतियथासंख्यमध्याहार्यंपिंडश्चा
स्तंनत्त्वेवमथापिस्त्वेदत्तत्राप्यर्थापत्तिलभ्यार्थवाचकशब्दाध्याहाराच्छाब्दबोधस्यैवसंभवादित्यतआहपीनइतिनलक्ष्य
तेनशाब्दबोधविषयीक्रियतेदिवाभोजित्वपीनदेहयोरेवशब्दसंशाब्दबोधेनविषयीकरणादित्यर्थः।ननुतर्हिकथमनुभव
सिद्धारात्रिभोजित्वप्रतीतिरित्याहश्रुतार्थेतिशाब्दबोधानंतरंपीनत्वानुपपत्तिज्ञानरूपार्थापत्त्यारात्रिभोजनंप्रतीयतइत्य
र्थः शाब्दीत्याकांक्षाशाब्देनैवपूर्यतेइतिमतेऽर्थापत्तिलभ्येप्यर्थेशब्दकल्पनापक्षेश्रुतशब्देनतदर्थस्यश्रुतत्वात्श्रुता
र्थापत्तिःतदकल्पनपक्षेत्वर्थापत्तिरितिमतभेदेनव्यवस्थितोवाकारार्थः॥इत्थमुपादानलक्षणांव्याख्येयपरार्थेत्यस
मर्पणमित्यनेनोक्तंलक्षणलक्षणांव्याचष्टेगंगायामितिस्वार्थमर्पयतीतिपरार्थमयेतीरेस्वार्थस्वार्थतामर्पयतिति:क्षि

पतीत्यर्थः पदार्थमात्रबोधनमेव पदार्थस्यार्थतानिक्षेपः। तत्पादानेन लक्षणामेवान्नयबोधार्थस्यार्थस्याप्युपस्थापनं
२७ वाष्यबोधार्थं तदूपस्थापनमस्त्येवं लक्षणेनेत्युपलक्षणेनेत्यर्थः अन्वयबोधे शक्यार्थस्याप्रवेशनमेवोपलक्षणं लक्षणामि
त्यत्र कारणो गूढलक्षणेनेत्यत्र तु भावेऽत्स्तु नाशुद्धेवेति व्याचष्टे उभयत्रापि विनिशुद्धेति शुद्धैवेत्यर्थः तत्र हेतुमाह उप
२१ चारेणेति शक्यलक्ष्ययोरभेदोपचारपूर्वकत्वाभावादित्यर्थः वक्ष्यमाणलक्षणाचतुष्टये तु लक्ष्यशक्यवाचकयोः समान
विभक्तिकपदयोः सत्वेन प्रथमं लक्ष्यार्थे शक्यार्थाभेदोपचारस्तत स्तद्बोधे लक्षणा तादृशोपचारपूर्वकत्वे च सति संबंधमे
दात्त लक्षणा या गौणीत्वं शुद्धत्वं च वक्ष्यते अनयोस्तु तादृशोपचारपूर्वकत्वाभावाच्छुद्धत्वमेवेत्यर्थः नन्वेवमनयोः शाब्दमि
काभेदोपचाराभावेन तन्मूलकं पश्चादारोपे तदभेदारोपरूपं प्रयोजनमस्ति तथा च प्रयोजनज्ञाननिर्वाह्येनेमे लक्षणे
किंतु शक्यलक्ष्यसंबंधज्ञानमात्रनिर्वाह्ये एव तथा च वक्ष्यमाणे तेयार्थलक्षणारूपे एव द्वे इमे कविप्रयोजनाना न हीत्यादसु रा.म.
त्याद्ये एवेति भ्रांतशंकां प्रयोजनांतरस्य त्वप्रदर्शनेन निवस्यति अनयोरिति भेदरूपमित्यत्र भेदोऽभेदातिरिक्तः संबंधः २७